# गन्धमादनः

## (विभक्तिप्रयोगः - प्रथमाविभक्तितः चतुर्थीविभक्तिपर्यन्तम्)



पुण्यभूमिः **उत्कलः** गिरिनदीवनभूमिभिः विमण्डितः । एतस्य उच्चपर्वतेषु गन्धमादनः अन्यतमः । गन्धमादनपर्वतमालायाः समुच्चशृङ्गस्य उच्चता ३२३४ फुट (चतुस्त्रिंशदधिकद्वात्रिंशत्शत) फुटपरिमिता भवति। एषः बलांगिरवरगड़मण्डलयोः प्राकृतिकप्राचीरम् अस्ति। खनिजद्रव्यनिमित्तं गन्धमादनः विश्वप्रसिद्धः । एषः बलांगिरतः सप्तविंशतिक्रोशदूरे अवस्थितः । गन्धमादनः घनश्यामवनराजिभिः परिवेष्टितः । अतः पर्यटकानां मनः हरति । अत्र नानाविधाः पशुपक्षिणः निवसन्ति । अनेकाः दुर्लभाः आयुर्वेदवृक्षलताः सन्ति । अतः गन्धमादनं निकषा एकः आयुर्वेदमहाविद्यालयः स्थापितः । ह्वेनसांगः गन्धमादनं **परिमलगिरिः** इति लिखितवान् ।

गन्धमादनस्य उत्तरपार्श्वे नृसिंहनाथमन्दिरम् अवस्थितम् । एतत् **कोणार्कमन्दिरशैल्या** कारुखचितं भवति । अत्र पर्वतशिखरात् जलप्रपातः तुषारभ्रमं करोति । झराणां कलनादः अतीव चित्ताकर्षकः । नृसिंहचतुर्दश्याम् अत्र एका विशाला मेला भवति । तदा यात्रिकाः भक्ताः **परिवारेण** सह आगच्छन्ति । **भक्त्या** देवं प्रणमन्ति । **तस्मै** पुष्पार्घ्यं समर्पयन्ति । ततः पार्वत्य**मार्गेण** हरिशङ्करपीठं गच्छन्ति । **मार्गम्** उभयतः प्राकृतिकशोभा रमणीया भवति ।

गन्धमादनस्य दक्षिणपार्श्वे हरिशंकरमन्दिरं राजति । एतत् मन्दिरं नृपतेः वैजलदेवस्य पत्नी दुर्लभादेवी निर्मितवती । **मन्दिरं** परितः विविधाः पुष्पपादपाः शोभां वर्द्धयन्ति । पर्यटकाः विहारयात्रार्थं **हरिशंकरं** प्रति आगच्छन्ति । यात्रिकाः **देवदर्शनेन** सह पर्वतारोहणस्य **मोदं** नयन्ति । निर्झरेषु जलक्रीड़ां कृत्वा पथश्रमम् अपनोदयन्ति । जलप्रपातानां दृश्यम् अतीव मनोहरं भवति । शीतकाले अत्रत्यपरिवेशः हर्षकः । अतः पर्यटकाः विलासिजनाः च **हरिशंकरं** ग्रीष्मनिवासरूपेण व्यवहरन्ति । एतत् स्थानं ओड़िशाराज्यस्य प्रमुखं पर्यटनकेन्द्रं भवति ।

गन्धमादनगमनं विना न कश्चित् वास्तविकम् अनुभवं प्राप्नोति । अतः एतत् स्थानं सर्वेषां दर्शनीयम् ।

**विमण्डितः, गन्धमादनः, कलनादः, यात्रिकाः, मोदं, व्यवहरन्ति, निर्झरेषु, चित्ताकर्षकः ।**

## टिप्पणी

**शब्दार्थ :**

विमण्डित: - अलंकृत: (ଅଳଂକୃତ) ।

३२३४ फुटपरिमिता - चतुस्त्रिंशदधिकद्वात्रिंशत्शत फुटपरिमिता

सप्तविंशतिक्रोश - ८१ कि.मि. परिमितं दूरत्वम् (୨୭ କୋଶ ବା ୮୧ କି.ମି.) ।

कारुखचितम् - शिल्पकलायुक्तम् (ଶିଳ୍ପକଳାଯୁକ୍ତ) ।

झराणाम् - निर्झराणाम् (ଝରଣାମାନଙ୍କର) ।

यात्रिका: - यात्रिण: (ଯାତ୍ରୀମାନେ) ।

राजति - शोभते । (ଶୋଭାପାଉଛି) ।

विहारयात्रार्थम् - परिभ्रमणाय (ବୁଲିବା ପାଇଁ) ।

अपनोदयन्ति - दूरं कुर्वन्ति, लाघवं कुर्वन्ति (ଦୂର କରନ୍ତି) ।

हर्षक: - आनन्ददायक: (ଆନନ୍ଦଦାୟକ) ।

व्यवहरन्ति - व्यवहारं कुर्वन्ति (ବ୍ୟବହାର କରିଥାନ୍ତି) ।

वास्तविकम् - यथार्थम् (ଯଥାର୍ଥ) ।

प्राप्नोति - लाभं करोति । (ପାଇଥାନ୍ତି) ।

१. **(क) उच्चै: पठत, लिखत च - (अकारान्त - पुंलिङ्गशब्दा:)**

**प्रथमाविभक्ति:**

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| बालक | बालक: | बालकौ | बालका: |
| देव | .......... | .......... | .......... |
| गज | .......... | .......... | .......... |
| आकाश | .......... | .......... | .......... |
| हस्त | .......... | .......... | .......... |
| मार्ग | .......... | .......... | .......... |

**(आकारान्त - स्त्रीलिङ्गशब्दाः)**

| | | | |
|---|---|---|---|
| बालिका | बालिका | बालिके | बालिकाः |
| पत्रिका | .......... | .......... | .......... |
| मुद्रिका | .......... | .......... | .......... |
| पुस्तिका | .......... | .......... | .......... |
| कथा | .......... | .......... | .......... |

**(ईकारान्त - स्त्रीलिङ्गशब्दाः)**

| | | | |
|---|---|---|---|
| नदी | नदी | नद्यौ | नद्यः |
| देवी | .......... | .......... | .......... |
| भवती | .......... | .......... | .......... |
| रजनी | .......... | .......... | .......... |
| काशी | .......... | .......... | .......... |
| पुत्री | .......... | .......... | .......... |

**अकारान्त - नपुंसकलिङ्ग-शब्दाः**

| | | | |
|---|---|---|---|
| फल | फलम् | फले | फलानि |
| जल | .......... | .......... | .......... |
| पत्र | .......... | .......... | .......... |
| गृह | .......... | .......... | .......... |
| द्वार | .......... | .......... | .......... |
| कूल | .......... | .......... | .......... |

**(ख) उच्चैः पठत, लिखत च - (अकारान्त - पुंलिङ्ग-शब्दाः)**

**द्वितीयाविभक्तिः**

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| बालक | बालकम् | बालकौ | बालकान् |
| देव | .......... | .......... | .......... |
| गज | .......... | .......... | .......... |
| आकाश | .......... | .......... | .......... |

| | | | |
|---|---|---|---|
| हस्त | .......... | .......... | .......... |
| मार्ग | .......... | .......... | .......... |

**(आकारन्त - स्त्रीलिङ्ग-शब्दाः)**

| | | | |
|---|---|---|---|
| बालिका | बालिकाम् | बालिके | बालिकाः |
| पत्रिका | .......... | .......... | .......... |
| मुद्रिका | .......... | .......... | .......... |
| पुस्तिका | .......... | .......... | .......... |
| कथा | .......... | .......... | .......... |

**(ईकारान्त - स्त्रीलिङ्ग-शब्दाः)**

| | | | |
|---|---|---|---|
| नदी | नदीम् | नद्यौ | नदीः |
| देवी | .......... | .......... | .......... |
| भवती | .......... | .......... | .......... |
| रजनी | .......... | .......... | .......... |
| काशी | .......... | .......... | .......... |
| पुत्री | .......... | .......... | .......... |

**(अकारान्त - नपुंसकलिङ्ग-शब्दाः)**

| | | | |
|---|---|---|---|
| फल | फलम् | फले | फलानि |
| जल | .......... | .......... | .......... |
| पत्र | .......... | .......... | .......... |
| गृह | .......... | .......... | .......... |
| द्वार | .......... | .......... | .......... |
| कूल | .......... | .......... | .......... |

**(ग) उच्चैः पठत लिखत च - (अकारान्त - पुलिंङ्ग-शब्दाः)**

**तृतीयाविभक्तिः**

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| बालक | बालकेन | बालकाभ्याम् | बालकैः |
| देव | .......... | .......... | .......... |

| | | | |
|---|---|---|---|
| गज | .......... | .......... | .......... |
| आकाश | .......... | .......... | .......... |
| हस्त | .......... | .......... | .......... |
| मार्ग | मार्गेण | .......... | .......... |

**(आकारान्त - स्त्रीलिङ्ग-शब्दाः)**

| | | | |
|---|---|---|---|
| बालिका | बालिकया | बालिकाभ्याम् | बालिकाभिः |
| पत्रिका | .......... | .......... | .......... |
| मुद्रिका | .......... | .......... | .......... |
| पुस्तिका | .......... | .......... | .......... |
| कथा | .......... | .......... | .......... |

**(ईकारान्त - स्त्रीलिङ्ग-शब्दाः)**

| | | | |
|---|---|---|---|
| नदी | नद्या | नदीभ्याम् | नदीभिः |
| देवी | .......... | .......... | .......... |
| भवती | .......... | .......... | .......... |
| रजनी | .......... | .......... | .......... |
| काशी | .......... | .......... | .......... |
| पुत्री | .......... | .......... | .......... |

**(अकारान्त - नपुंसकलिङ्ग-शब्दाः)**

| | | | |
|---|---|---|---|
| फल | फलेन | फलाभ्याम् | फलैः |
| जल | .......... | .......... | .......... |
| पत्र | पत्रेण | .......... | .......... |
| गृह | गृहेण | .......... | .......... |
| द्वार | द्वारेण | .......... | .......... |
| कूल | .......... | .......... | .......... |

(घ) उच्चैः पठत लिखत च - (अकारान्त - पुलिंङ्ग-शब्दाः)

**चतुर्थीविभक्तिः**

| | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|
| बालक | बालकाय | बालकाभ्याम् | बालकेभ्यः |
| देव | .......... | .......... | .......... |
| गज | .......... | .......... | .......... |
| आकाश | .......... | .......... | .......... |
| हस्त | .......... | .......... | .......... |
| मार्ग | .......... | .......... | .......... |
| | **(आकारान्त - स्त्रीलिङ्ग-शब्दाः)** | | |
| बालिका | बालिकायै | बालिकाभ्याम् | बालिकाभ्यः |
| पत्रिका | .......... | .......... | .......... |
| मुद्रिका | .......... | .......... | .......... |
| पुस्तिका | .......... | .......... | .......... |
| कथा | .......... | .......... | .......... |
| | **(ईकारान्त - स्त्रीलिङ्ग-शब्दाः)** | | |
| नदी | नद्यै | नदीभ्याम् | नदीभ्यः |
| देवी | .......... | .......... | .......... |
| भवती | .......... | .......... | .......... |
| रजनी | .......... | .......... | .......... |
| काशी | .......... | .......... | .......... |
| पुत्री | .......... | .......... | .......... |
| | **(अकारान्त - नपुंसकलिङ्ग-शब्दाः)** | | |
| फल | फलाय | फलाभ्याम् | फलेभ्यः |
| जल | .......... | .......... | .......... |
| पत्र | .......... | .......... | .......... |
| गृह | .......... | .......... | .......... |
| द्वार | .......... | .......... | .......... |
| कूल | .......... | .......... | .......... |

२. **(क) पश्यत, पठत -**

| | |
|---|---|
| छात्रः अस्ति, शिक्षकः अस्ति । | छात्रः शिक्षकं नमति । |
| शिशुः अस्ति, माता अस्ति । | शिशुः मातरम् पश्यति । |
| बालकः अस्ति, विद्यालयः अस्ति । | बालकः विद्यालयं गच्छति । |

मार्गम् उभयतः वृक्षाः सन्ति । विद्यालयं परितः प्राचीरम् अस्ति । धनं विना सुखं नास्ति ।
नदीम् उभयतः ग्रामाः सन्ति । मातरम् अभितः शिशुः धावति । विद्याम् ऋते जीवनं वृथा ।
पुत्रः पितरम् अनु गच्छति । नदीं यावत् गच्छेत् । श्रमम् अन्तरेण फलं नास्ति ।

**(ख)**

| | |
|---|---|
| शिक्षकः अस्ति, सुधाखण्डः अस्ति । | शिक्षकः सुधाखण्डेन लिखति । |
| छात्रः अस्ति, कलमः अस्ति । | छात्रः कलमेन लिखति । |
| युवकः अस्ति, यानम् अस्ति । | युवकः यानेन गच्छति । |

**(ग)** पुत्रः गच्छति । जनकः गच्छति । पुत्रः जनकेन सह गच्छति ।
दरिद्रः अस्ति । धनम् अस्ति । दरिद्रस्य धनेन प्रयोजनम् अस्ति ।
बालकाः सन्ति, बालिकाः सन्ति । बालकाः बालिकाभिः सार्द्धं क्रीड़न्ति ।

**(घ)**

| | |
|---|---|
| धनिकः अस्ति, दरिद्रः अस्ति । | धनिकः दरिद्राय धनं ददाति । |
| स्वामी अस्ति, सेवकः अस्ति । | स्वामी सेवकाय वेतनं प्रददाति । |
| पिता अस्ति, पुत्रः अस्ति । | पिता पुत्राय क्रुध्यति । |

## अभ्यासः

१. **योग्यपदेन शून्यस्थानं पूरयत -**

उदाहरणम् - मन्दिरम् उभयतः पुष्पोद्यानम् अस्ति । (मन्दिर - द्वितीया एकवचने)

(क) ............ परितः पिपीलिकाः सन्ति । (शर्करा - द्वितीया एकवचने)
(ख) ............ विना जीवनं न सम्भवति । (जल - द्वितीया एकवचने)
(ग) रामः ............ सह गच्छति । (लक्ष्मण - तृतीया एकवचने)
(घ) शिष्याः ............ पुष्पाणि ददति । (देव - चतुर्थी एकवचने)
(ङ) पिता ............ क्रुध्यति । (पुत्र - चतुर्थी एकवचने)
(च) माता ............ घटं पूरयति । (जल - तृतीया एकवचने)

(छ) युवकः ............ उपनेत्रं ददाति । (वृद्ध - चतुर्थी एकवचने)

(ज) मम ............ प्रयोजनम् अस्ति । (धन - तृतीया एकवचने)

(झ) ............ परितः प्रकाशः अस्ति । (दीप - द्वितीया एकवचने)

(ञ) अश्वाः .............. धावन्ति । (पाद - तृतीया बहुवचने)

(ट) वैद्यः ............ औषधं ददाति । (रुग्ण - चतुर्थी एकवचने)

(ठ) छात्रः .............. लिखति । (कलम - तृतीया एकवचने)

(ड) शिक्षकः ............ न क्रुध्यति । (छात्र - चतुर्थी एकवचने)

(ढ) शिशुः ............ पश्यति । (वानर - द्वितीया एकवचने)

**२. बन्धनीमध्यस्थयथार्थपदेन शून्यस्थानं पूरयत -**

(क) वृद्धः .............. गच्छति । (दण्डे, दण्डेन, दण्डाय)

(ख) कृषकः ............ खनति । (खनित्रेण, खनित्राय, खनित्रे)

(ग) भवन्तः ............ सह मा भ्रमन्तु । (दुष्टाम्, दुष्टैः, दुष्टेभ्यः)

(घ) यूयं ............. सह कन्दुकेन क्रीडत । (अस्मिन्, अस्माभिः, अस्माकम्)

(ङ) बालकाः .............. विना मूर्खाः भवन्ति । (अध्ययनं, अध्ययनाय, अध्ययने)

(च) जननी ............... खाद्यं यच्छति । (पुत्रं, पुत्राय, पुत्रे)

(छ) छात्राः ............. अर्चयन्ति । (गणेशाय, गणेशस्य, गणेशम्)

(ज) ............. परितः छात्राः तिष्ठन्ति । (शिक्षकस्य, शिक्षकं, शिक्षकाय)

(झ) मम ............... प्रयोजनम् अस्ति । (धने, धनेन, धनाय)

(ञ) मुनयः ............. अधिवसन्ति । (आश्रमम्, आश्रमे, आश्रमस्य)

**३. एकपदेन उत्तरं लिखत -**

(क) बलांगिरतः कियद्दूरे गन्धमादनः अस्ति ?

(ख) भक्ताः देवाय किम् अर्पयन्ति ?

(ग) के मन्दिरस्य शोभां वर्द्धयन्ति ?

(घ) पर्यटकाः विहारयात्रार्थं कुत्र आगच्छन्ति ?

(ङ) का हरिशंकरमन्दिरं निर्मितवती ?

**४. बन्धनीमध्यस्थयथार्थशब्दैः शून्यस्थानानि पूरयत -**

(क) अत्र नानाविधाः पशुपक्षिणः ................... । (निवसति, निवसतः, निवसन्ति)

(ख) ............ उभयतः प्राकृतिकशोभा रमणीया । (मार्गस्य, मार्गम्, मार्गाय)

(ग) दृश्यम् अतीव ........... भवति । (मनोहर:, मनोहारी, मनोहारि)

(घ) ............... पुष्पार्घ्यं समर्पयन्ति । (तस्मात्, तस्मिन्, तस्मै)

(ङ) .............. देवं प्रणमन्ति । (भक्तौ, भक्त्या, भक्ते:)

५. **मातृभाषया अनुवादं कुरुत -**

(क) अत्र नानाविधा: पशुपक्षिण: निवसन्ति ।

(ख) यात्रिका: परिवारेण सह आगच्छन्ति ।

(ग) तस्मै पुष्पार्घ्यं समर्पयन्ति ।

(घ) शीतकाले अत्रत्यपरिवेश: हर्षक: ।

(ङ) अत: एतत् स्थानं सर्वेषां दर्शनीयम् ।

६. **शुद्धशब्दं रचयत -**

ग मा न्ध द न:  ति: प्त विं स श  शं रि ह क र:  ग: ह्व सां न  ना नृ ह सिं थ:

७. **स्तम्भमेलनं कुरुत -**

| **'क' स्तम्भ:** | **'ख' स्तम्भ:** |
|---|---|
| तस्मै | लता: |
| मन्दिरं | नयन्ति |
| मार्गम् | परित: |
| अनेका: | देवाय |
| मोदं | उभयत: |

८. **संशोधनं कुरुत -**

(क) पर्वतस्य निकषा महाविद्यालय: अस्ति ।

(ख) ते भक्तिना देवं पूजयन्ति ।

(ग) नानाविधा: पशुपक्षय: निवसन्ति ।

(घ) झराणां कलनाद: चित्ताकर्षकम् ।

(ङ) शीतकाले अत्रत्यपरिवेश: हर्षका ।

९. **वाक्येषु व्यवहरत -**

अन्तरेण, भक्त्या, क्रमेण, क्रुध्यति, सह, अभित: ।

●